PAPER - 6

# MT

**2017 .... .... 1200** **Seat No.** | | | | | | | |

**MT - SANSKRIT ENTIRE (SECOND OR THIRD LANGUAGE) - SEMI PRELIM - II PAPER - VI**

**Time : 3 Hours** **(Pages 10)** **Marks : 80**

**प्रथमः विभागः - गद्यम् ।**

**प्र.१. अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

I) उचितं कारणं चित्वा वाक्यं पुनर्लिखत । १

टाटाकम्पनीप्रमुखेण विनायकः लण्डनस्थितां रॉयल-ॲकॅडमी-संस्था प्रति प्रेषितः यतः ........ । (प्रगताध्ययनं विनायकस्य कृते महत्त्वपूर्णम्। / विनायकः पर्यटनं कर्तुम् ऐच्छत्।)

II) पूर्णवाक्येन उत्तरत । १

सन्तज्ञानेश्वरमहाराजस्य प्रतिमा कीदृशी ?

III) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यं लिखत । १

विनायकेन नाट्यशालायाः कृते छत्रपतिशिवाजीमहाराजस्य प्रतिमा निर्मिता ।

समाप्तेऽध्ययने रॉथफिल्डमहोदयेन गुरुवर्यरवीन्द्रनाथटागोर- महोदयेन सार्धमस्य परिचयः कारितः। गुणी गुणिनं वेत्तीति सूक्त्यनुसारं रवीन्द्रनाथेन कोलकत्तानगरं स निमन्त्रितः । तत्र विनायकेन बेल्लूरमठस्य कृते श्रीरामकृष्ण परमहंसमहोदयस्य पूर्णाकृतिः प्रतिमा निर्मिता । रवीन्द्रनाथ-गान्धीमहोदयादीनां प्रतिमानिर्माणे रतस्यास्य कौशल्यं ज्ञात्वा टाटाकम्पनीप्रमुखेण स प्रगतशिक्षणार्थं लण्डनस्थितां रॉयलॲकॅडमीसंस्थां प्रति प्रेषितः । तत्रापि प्रावीण्यं संप्राप्य स इटली-फ्रान्स- स्वित्झर्लण्डादिदेशस्थान् शिल्पकारान् मिलित्वा, तेषां च कलाकृतीनामध्ययनं कृत्वा स्वदेशं प्रत्यागतः । पुनश्च तेन कोलकत्तानगरे पारितोषिकार्हा शङ्खध्वनिः इति विशेषप्रतिमा प्रदर्शनार्थं निर्मिता । पुणेनगरस्थसैनिकशालायाः कृते छत्रपतिशिवाजीमहाराजस्य अश्वारूढप्रतिमानिर्माणकार्ये नियुक्तोऽसौ राजर्षि-शाहूमहाराजमहोदयेन । सार्धत्रयोदशफूटपरिमितोन्नतः अष्टटनभारः एष पुत्तलः अधुनापि सर्वेषां नेत्रसुखविषयः विराजते । यशसा कीर्त्या च विराजमानेनानेन वडोदरा-सांगली-मिरजादिसंस्थानिकानां कृते बहवः प्रतिमा निर्मिताः । तासु फलटणनगरस्था तेन निर्मिता मणिशिलामयी सन्तज्ञानेश्वरमहाराजस्य प्रतिमा विशेषरूपा । सप्तचतुर्नवैकतमे ख्रिस्ताब्दे (१९४७) अमेरिकास्थितव्हिसकॉन्सिन-विद्यापीठेन विशेषरूपेणायं निमन्त्रितः । तत्रापि प्रेक्षकाणां पुरतः एव कुलगुरु-दलानमहोदयस्य प्रतिमानिर्माणं कुर्वन् विदेशेऽपि स गौरवितः । मुम्बईनगरे उच्चन्यायालयस्य पुरतः रवीन्द्रनाट्यमन्दिरे तथैव जहांगीर-आर्टसोसायटी इति संस्थायां करमरकरमहोदयस्य प्रतिभाविष्काररूपाणि शिल्पानि विराजन्ते । न केवलं स शिल्पकारः स दयासागरः स्वराष्ट्रानुरागी च । स्वग्रामोन्नत्यर्थं तेन सदैव साहाय्यं कृतम्। अकिञ्चनच्छात्राणां कृते स शरण्यः ।

भूमिगतस्वातन्त्र्यसैनिकानां महाश्रयः खल्वासीत् । स्वजीवनं कृतार्थतां नीत्वा एष महान् शिल्पकारः सप्तषण्णवैकतमे (१९६७) ख्रिस्ताब्दे पञ्चत्वे विलीनः परं स्वप्रतिभानिर्मितशिल्पैः चिरजीवी सञ्जातः ।

**२. शब्दज्ञानम् । (काः अपि ३ कृतीः कुरुत ।)**

I) योग्यं पर्यायं चिनुत । १

१) खल्वासीत् - ......... + ......... । (खल्व + आसीत् । / खलु + आसीत् ।)

२) पुनश्च - ......... + ......... । (पुनः + श्च । / पुनः + च ।)

II) चतुर्थपदं लिखत । १

१) अल्पाः : बहवः :: पश्चात् : ............ ।

२) मूर्तयः : प्रतिमा :: प्रगतिः : ............ ।

III) विशेषण-विशेष्य-अन्वितिः । १

............ , ............ प्रतिमा ।

IV) गद्यांशात चित्वा द्वे धातुसाधित-त्वान्त-अव्यये लिखत । १

**३. स्वमतप्रकटनम् ।** २

गुणी गुणिनं वेत्ति इति सुक्ति माध्यमभाषया स्पष्टीकुरुत ।

**प्र.१. ब) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

I) उचितं कारणं चित्वा वाक्यं पुनर्लिखत । १

लेरसिया ताभ्यां भ्रातृभ्यां साकं रुक्षमन्नमपि अभक्षयत् यतः .........

(सः बुभुक्षितः आसीत् । / सः आत्मिकी-सम्पदम् अपश्यत् ।)

II) कः कं वदति ? १

एषा एव तयोः आत्मिकी सम्पद् ।

III) वाक्यं पुनर्लिखित्वा योग्यं वा अयोग्यमिति लिखत । १

आत्मिक्याः सम्पदः किमपि मूल्यं न अस्ति ।

तस्मिन् जनस्थाने द्वौ भ्रातरौ न्यवसताम् यावतीव अधनौ परं मनसोदारौ करुणापरौ च। ताभ्यां ज्ञातं यद् ग्रामे एकोऽभद्ररूपः कश्चिज्जनो जीर्णवस्त्राधानः क्षुत्पीडितः स्थितः। न कश्चन तेन सह वार्तामपि करोतीति । तयोरेकस्तस्य समीपं गत्वाऽवदत्, भद्र, वयं तु अधनाः। अस्माकमेतावदपि धनं नास्ति यद् वयं भोजनार्थं किमपि भवते समर्पयामः। तथापि वयमिच्छामो यद् भवानस्माकं जीर्णकुटीमागच्छतु प्रज्ज्वलिताग्नेरुष्णतां चानुभवतु। यत् किमप्यस्मत्सविधे विद्यते तदास्वादयतु ।'' तथेत्युक्त्वालेरसिया ताभ्यां भ्रातृभ्यां सह कुटीं गत्वा ताभ्यां सह मोदमानः रात्रिमयापयत्। ताभ्यां साकं रूक्षमन्नमपि तेन सानन्दं भक्षितम्। प्रत्युषसि तेनात्मनः सत्यरूपं प्रकटीकृत्य आत्मपरिचियस्तयोःकारितः। अचिरादेवैषा वार्ता ग्रामे प्रसृता । सर्वे ग्रामवासिनः चकिता लज्जिताश्चाभवन् । एष महाजनो

ग्रामागतोऽपिनास्माभिर्विज्ञातः तेन सह शिष्टसम्मतो वा मानुषो आचारोऽपि न कृतः इति विचारेण ते खिन्ना जाताः । केचन धनिकास्तं जनप्रमुखं स्वगृहं नेतुं तां कुटीमधावन्। परं तौ त्यक्त्वा स नान्यत्र गतः। तावेव मम मित्रे इति सोऽकथयत् । मम परिचयोऽपि नासीत् तयोः परं मम दैन्यावस्थां वीक्ष्यापि ताभ्यां मह्यं सत्कारो प्रतिपादितः । तौ अधनौ किन्तु तयोः मनसी उदारे । एषैव तयोः आत्मिकी सम्पद् । केभ्यश्चिद्दिनेऽभ्योनन्तरं लेरसियाप्रेषितेन विज्ञापनापत्रानुसारं तौ भ्रातरौ तस्य जनपदस्थानं गतौ। तत्र स प्रमुखस्ताभ्यां महत् स्वागतं समर्पयामास । नैकप्रकारान् उपहारान्, नैकान् वृषसदृशान् मिठूनप्राणिनोऽपि ताभ्यामुपायनीकृतवान् येन तौ आढ्यौ सञ्जातौ । इत्थं लेरसिया तयोर्मार्दवं पारितोषिकैः सम्मानितवान । ततोऽपरान्तं ग्रामवासिजना अपि ताभ्यां सह सादरं व्यवहरन्ति स्म । तैरपि ज्ञातमधुनात्मिक्याः सम्पदः मूल्यं सामर्थ्यं च ।

**२. शब्दज्ञानम् । (काः अपि ३ कृतीः कुरुत ।)**

I) रिक्तस्थानपूर्तिं कुरुत । १

१) यावतीव = ....... + ....... ।

२) तथेत्युक्त्वा = ....... + ....... + ....... ।

II) समूहेतरपदं लिखत । १

१) सह, सखा, साकम्, सार्धम् । - ..........

२) वसनम्, चीवरम्, सत्वरम्, अंशुकम् । - ..........

III) विशेषण-विशेष्य-अन्वितिः । १

......... , ......... भ्रातरौ ।

IV) गद्यांशे आगते द्वे पूर्वकालवाचक-धातुसाधित-ल्यबन्त-अव्यये चित्वा लिखत । १

**३. पृथक्करणम् ।** २

**क्रमसंयोजनम् ।**

i) धनिकाः लेरसियामहोदयं नेतुं तां कुटीमधावन् ।

ii) लेरसियामहोदयः आत्मनः सत्यरूपं प्रकटितवान् ।

iii) भ्रातरौ त्यक्त्वा लेरसियामहोदयः न्यान्यत्र गतः ।

iv) ग्रामवासिनः चकिताः लज्जिताः चाभवन् ।

**प्र.१. क) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

I) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत । १

रुग्णः सूर्योदयस्य ....... आगच्छतु इति अनन्तभट्टस्य आज्ञा । प्रभाते बालसूर्यस्य किरणेषु पद्भ्यां चलनेन सोमशर्मा ....... अभवत् । (पूर्वम् / पश्चात्) (आनन्दितः / दुःखितः)

II) पूर्णवाक्येन उत्तरं लिखत । १

अनन्तभट्टेन किम् अपेक्ष्यते ?

III) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत । १

सोमशर्मा अनन्तभट्टं प्रति सानन्दं गतवान् ।

चन्द्रपुरनाम्नि नगरे सोमशर्मा नाम धनिको वणिग् निवसति स्म । तस्य नैके व्यवसायाः आसन् । उद्योगव्यग्रः स गच्छता कालेन अस्वास्थ्यमनुभवति स्म । नैके उपचारा जाताः, परं सर्वे विफलाः । एकस्मिन् दिने तस्मै अनन्तभट्टवैद्यस्य विषये केनापि कथितम् । ततस्तमानेतुं तेन धनिकेन सत्वरं सेवकः प्रेषितः । किन्तु सेवकेन आनीते सन्देशे लिखितमासीत्, 'भवन्तमुपचरितुं सानन्दमिच्छामि । तथापि मया मम नियमानां पालनमपेक्ष्यते । चिकित्सामभिलषन् रुग्णः स्वयमेव मम समीपे आगच्छतु । कृपया सूर्योदयादनन्तरं पद्भ्यामेव आगच्छतु ।'अनिच्छयैव अन्येद्युः सोमशर्मा अनन्तभट्टं प्रति पद्भ्यामेव गतवान् । बालसूर्यस्य किरणेषु पद्भ्यां चलनेन प्रसन्नः सोमशर्मा, ''कृपया, भवान् सत्वरमुपचारं करोतु । शीघ्रं गन्तव्यं मया,'' इत्यवदत्। अनन्तभट्टोऽभाषत, ''भोः, भवान् प्रतिदिनं प्रभाते करणीयानि कार्याणि समाप्य उद्यानस्य निकटे प्रवहतो निर्झरस्य जले स्नात्वा प्रत्यागच्छतु।'' अनन्तभट्टस्यादेशेन उद्विग्नः सोमशर्मा तत्स्थानं गत्वा स्नानं कृतवान् । शुचिर्भूतः सोमशर्मा अनन्तभट्टस्य गृहं प्रत्यागतवान् । ततस्तस्य वैद्यस्य पत्न्या परिवेषितं सात्त्विकमल्पं प्रातराशं भक्षयित्वा सन्तुष्टोऽभवत्। अनन्तरं सः अनन्तभट्टेन सह उद्याने आम्रवृक्षस्याधः दोलायामुपविष्टः । औषधानां विषये वारं वारं सोमशर्मणा पृष्टे सति अनन्तभट्टो व्याधयः कीदृशं पीडयन्ति एतत् स्पष्टीकुर्वन्नासीत्। दोलायामुपविष्टः सोमशर्मा शनैः शनैः निद्राधीनो जातः । सहसा लघ्वाघातेन जागरितः सोमशर्मा संकोचेनावदत्, ''क्षम्यताम् । निद्रापीडितोऽहं कदा सुप्तः इति न जाने । अतश्चकितोऽहम् । कृपया भवान् मम उपचारान् कथयति किम् ?''

**२. शब्दज्ञानम् । (काः अपि ३ कृतीः कुरुत ।)**

I) योग्यं पर्यायं चिनतु । १

१) अनिच्छयैव - ....... + एव । (अनिच्छय / अनिच्छया)

२) स्पष्टीकुर्वन्नासीत् - ....... + आसीत् । (स्पष्टीकुर्वन् / स्पष्टीकुर्वन्न)

II) मेलनं कुरुत । १

| अ | ब |
|---|---|
| उपचारः | सेवकाः |
| आमयाः | चिकित्सा |
| | रोगाः |

III) गद्यांशात् विशेष्ये चित्वा लिखत । १

नैके ........ , ........ ।

IV) गद्यांशात् चित्वा के अपि द्वे तृतीया - विभक्त्यन्तपदे लिखत । १

३. **पृथक्करणम् ।** २

**जालचित्रं पूरयत ।**

सोमशर्मा

| बालसूर्यस्य किरणेषु पद्भ्यां चलनेन | प्रातराशं भक्षयित्वा | अनन्तभट्टस्यादेशेन | निर्झरस्य जले स्नात्वा |
|---|---|---|---|
| | | | |
| अभवत् | अभवत् | अभवत् | अभवत् |

## द्वितीयः विभागः - पद्यम् ।

**प्र.२. अ) पद्यांशौ पठित्वा निर्दिष्टे कृती कुरुत ।**

१. **पृथक्करणम् ।** २

| युद्धनाम | वर्णः | घोषः | कवयित्री कं नमति ? |
|---|---|---|---|
| | | | |

नमामि राष्ट्रध्वजं त्रिवर्णात्मकं नैकवारम् ।
स्मारयते मां कीर्तिकथा यो महतामनवरतम् ॥१॥
यैः सततं मातृभूः सेविता
स्वशोणितेन च धरणी रक्ता
कारगिलमखे स्वप्राणास्तैर्हुताश्च सोल्लासम्
हौतात्म्यं तद् ध्वजोत्तमाङ्गे कषायतां प्राप्तम्
कषायवर्णो ध्वजस्थितो मां प्रेरयते सततम्
'जयतु जवानो' वदन्ती ह्यहं नमामि योद्धारम् ॥२॥

२. **स्पष्टीकरणम् ।** २

'जयतु जवानः' इति कवयित्री किमर्थं वक्तुम् इच्छति ? इति माध्यमभाषया स्पष्टीकुरुत ।

**प्र.२. ब) पद्यांशान् पठित्वा निर्दिष्टे कृती कुरुत ।**

वंशभवो गुणवानपि सङ्गविशेषेण पूज्यते पुरुषः ।
न हि तुम्बीफलविकलो वीणादण्डः प्रयाति महिमानम् ॥१॥
यस्य न ज्ञायते वीर्यं न कुलं न विचेष्टितम् ।
न तेन सङ्गतिं कुर्यादित्युवाच बृहस्पतिः ॥२॥
सदा सद्ग्रन्थानां श्रवणमनने ये विदधते ।
नयन्ते वा कालं कविकृतविनोदैः प्रमुदिताः ।
भ्रमं दूरीकुर्वन्ति च सदुपदेशेन कुधियां
स्वयं निर्भ्रान्तत्वात् प्रभुपदरतास्ते सुकृतिनः ॥३॥

**१. शब्दज्ञानम् ।**

I) मेलनं कुरुत । १

| अ | ब |
|---|---|
| प्रयाति | अनभिद्रोहः |
| गुणवान् | आयाति |
| | गुणहीनः |

II) द्वे विशेषणे लिखत । सुकृतिनः - ......., ....... १

**२. अन्वयपूर्तिः ।** २

यस्य वीर्यं, ......, विचेष्टितं न ...... तेन ...... न कुर्यात् इति ...... उवाच ।

**क) द्वे सुभाषिते शुद्धे पूर्णे च लिखत ।** ४

i) रक्ष ........... भवद्गुणाः ॥

ii) ज्ञानेन ........... महानुभावाः ॥

iii) गजाननं ........... पङ्कजम् ॥

**ड) वृत्तनाम चिनुत ।** १

महीपतेः सन्ति न यस्य पार्श्वे
कवीश्वरास्तस्य कुतो यशांसि ।
भूपाः कियन्तो न बभूवुरुर्व्यां
नामापि जानाति न कोऽपि तेषाम् ॥

(उपेन्द्रवज्रा / इन्द्रवज्रा / गीतिः)

## तृतीयः विभागः - स्थूलवाचनम् ।

**प्र.३. अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् ।**

I) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यं लिखत । १

चित्रं धर्मकामार्थमोक्षदम् ।

II) एकपदेन उत्तरं लिखत । १

मार्कण्डेयमुनिः कस्याः श्रेष्ठत्वम् उक्तवान् ?

'विष्णुधर्मोत्तरपुराणम्' इति अस्मिन् ग्रन्थे चित्रकलाशास्त्रं विस्तरेण वर्णितं विद्यते । 'मार्कण्डेय-वज्रसंवादः' तत्र प्रख्यातः । वज्रमहाराजेन, ''लोके-परलोके सुखसाधनं किम् इति' पृष्टे सति मार्कण्डेयमुनिः चित्रकलायाः श्रेष्ठत्वम् इत्थं उक्तवान्-

यथा सुमेरुः प्रवरो नगानां यथाण्डजानां गरुडः प्रधानः ।
यथा नराणां प्रवरः क्षितीशः तथा कलानामिह चित्रकल्पः ॥

कलया न केवलं कलावताम् अपि तु सामान्यजनानाम् अपि सुखप्राप्तिः भवति ।

कलानां प्रवरं चित्रं धर्मकामार्थमोक्षदम् ।
माङ्गल्यं प्रथमं चैतद् गृहे यत्र प्रतिष्ठितम् ।।

अस्याः चित्रकलायाः प्रवर्तकः आसीद् धर्मसुतः नारायणः यः देवानां शिल्पी । सामान्येन चित्ररेखाः, आकारः, प्रकाशच्छाया च प्राधान्यं वहन्ति । चित्रे सादृश्यकरणं प्रधानं परिकीर्तितम्। स्थानं, प्रमाणं, मधुरत्वं, भूलम्भः, विभक्तता, सादृश्यं, क्षयः तथैव वृद्धिरित्येते अष्टगुणाः चित्रे अनुस्यूताः भवेयुः । तैः चित्रस्य सौन्दर्यं वर्धते । चित्रकलायां वर्णविन्यासे एवं चित्रकारस्य परीक्षा भवति नैपुण्यमपि च आविष्कृतं भवति । श्वेतः, रक्तः, पीतः, कृष्णः, हरितश्चैते पञ्च प्रधानवर्णाः विदिताः। द्वित्राणां सम्मिश्रणेन अवान्तरवर्णानां संख्या अगणिता वर्तते । परं सम्मिश्रणार्थं श्यामगौरवर्णौ अतीव महत्त्वपूर्णौ । रङ्गव्यतिकरैः चित्रस्य शोभा वर्धते। परमस्मिन् विषये चित्रकारस्य कल्पकता एव आवश्यकी ।

२. **पृथक्करणम् ।** २




## चतुर्थः विभागः - लेखनकौशल्यम् ।

**प्र.४. यथानिर्देशं कृतीः कुरुत । (केवलं ३ उपप्रश्नाः लेखनीयाः ।)**

**अ) कथापूर्तिः ।**

**मञ्जूषातः उचितशब्दान् चित्वा कथां पुनर्लिखत ।** ५

आसीत् अङ्गुलिमालः नाम कश्चित् कुख्यातः चोरः । ...... अरण्ये स निवसति स्म । पथिकान् लुण्ठयित्वा तेषां अङ्गुलीश्च कर्तयति स्म । तासां मालां कृत्वा कण्ठे धृता तेन तस्मात् तस्य नाम अङ्गुलिमाल इति । ...... सहस्रं धारयिष्यामि इति तेन प्रतिज्ञा कृता । कथमपि स ग्रहीतव्यः एतदर्थं राजा प्रयत्नशीलः आसीत् । राज्ञः एते प्रयासाः ......निवेदयितुं तस्य माता अरण्यम् आगच्छत् । प्रतिज्ञापूर्तये ...... अङ्गुलेः आवश्यकता आसीत् । तदर्थं स मातरमेव अङ्गुलिकर्तनार्थम् अतर्जयत् । यावदेवासौ अङ्गुलिं कर्तयति तावत् प्राप्तस्तत्र भगवान् बुद्धः । स भगवान् अङ्गुलिमालं एकं ...... अयाचत ।

(वृक्षस्य, अङ्गुलीनां, एकस्याः, पर्णम्, पुत्राय)

**ब) ३ पर्यायेषु १ विषयम् अधिकृत्य पञ्चवाक्यात्मकं निबन्धं लिखत ।** ५

i) व्यायामस्य महत्त्वम् । ii) दीपावलिः । iii) मम पिता ।

क) **संस्कृतानुवादः ।**

**८ वाक्येषु ५ वाक्यानां संस्कृतभाषया अनुवादं कुरुत ।** ५

i) River water is clean.

ii) When will you go to a village ?

iii) A cat likes milk.

iv) Clouds rain.

v) Sea water is salty.

vi) Rainbow is seen in the sky in monsoon.

vii) Delhi is the capital of India.

viii) Proper diet is essential for growth of the body.

ड) **वाक्यरचना ।**

i) धातूनां प्रयोगः - ४ धातुषु ३ धातून् प्रयुज्य ३ वाक्यानि संस्कृतभाषया लिखत । ३

१) दा - यच्छ् १ प.प. २) प्र + विश् ६ प.प.

३) स्निह् ४ प.प. ४) वि + रम् १ प.प.

ii) अशुद्धिसंशोधनम् - अव्ययानि प्रयुज्य रचितेषु ४ वाक्येषु २ वाक्ययोः अशुद्धिसंशोधनं कुरुत । २

१) माता बालकं सह आपणं गच्छति ।

२) सङ्गणकं समीपे मूषकः अस्ति ।

३) गुरुं नमः ।

४) बाल्याम् प्रभृति व्यायामः आवश्यकः ।

**पञ्चमः विभागः - व्याकरणम् ।**

**प्र.५ यथानिर्देशं कृतीः कुरुत । (केवलं ५ उपप्रश्नाः लेखनीयाः ।)**

अ) **क्रियापदरूपैः आवलिपूरणम् । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

**तृतीयपुरुष-एकवचनस्य रूपाणि लेखनीयानि ।**

| धातुः | द्वितीयः भविष्यकालः | प्रथमः भूतकालः | परोक्षः भूतकालः | वर्तमानकालः | आज्ञार्थः | विध्यर्थः |
|---|---|---|---|---|---|---|
| वस् (१ प.प.) | वसिष्यति | ....... | ....... | वसति | ....... | ....... |
| श्रु (५ प.प.) | ....... | ....... | शुश्राव | ....... | श्रृणोतु | ........ |

**ब) नाम-सर्वनामरूपैः आवलिपूरणम् । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| द्वितीया | ...... | धनवन्तौ | ...... |
| चतुर्थी | ...... | ...... | आत्मभ्यः |
| षष्ठी | तव | ...... | ...... |
| द्वितीया | ...... | ...... | भवताम् |

**क) धातुसाधित-विशेषणैः कोष्ठकपूर्तिं कुरुत । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

| कर्मणि भूतकालवाचक-धातुसाधित-विशेषणम् | कर्मणि विध्यर्थक-धातुसाधित-विशेषणम् | कर्तरि भूतकालवाचक-धातुसाधित-विशेषणम् | कर्तरि वर्तमानकालवाचक-धातुसाधित-विशेषणम् |
|---|---|---|---|
| | | | |

( स्मर्तव्यम्, लिखितम्, विचरन्, उषितवान्, करणीयः, विहरन्तः, पठितः, भूतवान् )

**ड) समासाः ।**

**कोष्ठकपूरणम् । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

| | **समस्तपदम्** | **विग्रहः** | **समासनाम** |
|---|---|---|---|
| i) | उपगङ्गम् | ................. । | अव्ययीभाव समास |
| ii) | अधोमुखस्य | अधः मुखं यस्य सः । | ................. |
| iii) | ................. | शीतवासाय इदम् । | चतुर्थी तत्पुरुष समास |
| iv) | अहर्निशम् | ................. । | समाहार द्वन्द्व समास |
| v) | अहितः | ................. । | नञ् बहुव्रीहि समास |
| vi) | अकिञ्चनच्छात्राः | ................. । | कर्मधारय समास |
| vii) | दूरस्थः | दूरे तिष्ठति इति । | ................. |
| viii) | ................. | सुष्ठु निश्चितम् । | प्रादि तत्पुरुष समास |

**इ) वाक्यपरिवर्तनम् । (४ पर्यायेषु ३ पर्यायाः लेखनीयाः ।)** ३

i) विनायकः बाल्ये एव मृत्प्रतिमाः निर्मातुं प्रारभत । (प्रयोगं परिवर्तयत ।)

ii) व्यये कृते विद्याधनं वर्धते एव नित्यम् । (सतिसप्तमीरचनां निष्कासयत ।)

iii) कृष्णः वेदान् वेत्ति । (सान्दीपनि) (प्रयोजकरचनां कुरुत ।)

iv) भवान् मह्यम् एनं चन्द्रं ददातु । (भवान् स्थाने त्वम् इति कर्तृपदं योजयत ।)

**फ) सङ्ख्यावाचकाः । (रिक्तस्थानपूर्तिः ।) (४ पर्यायेषु ३ पर्यायाः लेखनीयाः ।)** ३

i) कालिदासेन ......... नाटकानि लिखितानि । (3)

ii) साधु .......... उटजे निवसति स्म । (1)

iii) नाट्यशास्त्रम् इति .......... वेदः मन्यते बुधैः । (5th)

iv) अहं दिनस्य .......... दन्तधावनं करोमि । (twice)

## षष्ठः विभागः - अनुवादकौशल्यम् ।

**प्र.६. अ) संस्कृतगद्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत ।** ४

एकदा कश्चित् नरः मृगयार्थम् अगच्छत्। सः सर्वं दिनं वने अभ्रमत्, किन्तु कमपि पशुं नापश्यत्। सायंकाले यदा स्वगृहं प्रति आगच्छति स्म, तदा सः एकां पुत्रसहितां हरिणीमपश्यत्। सः नरः अश्वेन तस्याः अनुसरणमकरोत्। किन्तु सा मृगी कुत्रचित् अदृश्या अभवत्। ततः स तस्याः शावकं गृहीत्वा अश्वस्य पृष्ठे बद्धवान्। अश्वमारुह्य सः नरः किञ्चिद् दूरं गत्वा अपश्यद् यत् पुत्रस्नेहव्याकुला सा मृगी अपि पुत्रमनुसरति स्म। सः अचिन्तयत् - एषा हरिणी स्वप्राणमोहं त्यक्त्वा पुत्रं रक्षितुमिच्छति। अहो ! एतां निराशां न करिष्यामि इति विचार्य सः मृगीशावकम् अमुञ्चत्। हरिणी प्रसन्ना अभवत्।

**ब) संस्कृतपद्यांशौ पठित्वा माध्यमभाषया अनुवादं कुरुत ।** ४

i) न हि प्रमादात्परमस्ति किञ्चिद्वधो नराणामिह जीवलोके ।
प्रमत्तमर्था हि नरं समन्तात् त्यजन्त्यनर्थाश्च समाविशन्ति ॥

ii) पटुत्वं सत्यवादित्वं कथायोगेन बुध्यते ।
अस्तब्धत्वमचापल्यं प्रत्यक्षेणावगम्यते ॥

**क) संस्कृतनाट्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत ।** ४

**मन्त्री** – महाराज ! दुग्धपूर्णं पात्रं दत्त्वा मया सूचितं यत् अस्माकं राजसभा पण्डितैः पूर्णा। तत्र अन्यस्य अर्थे स्थानं नास्तीति।

**राजा** – अथ ब्राह्मणस्य उत्तरं किमासीत्?

**मन्त्री** – तेन उत्तरितम् - यथा दुग्धे शर्करा विलीना भवति तस्य माधुर्यं च वर्धयते। तथैवाहं पण्डितेषु निलीय स्थास्यामि, सभायाः माधुर्यं च वर्धयिष्यामि।

**राजा** – अहो ! अद्भुतं तस्योत्तरम्।

**Best of Luck**